ॐ

# ॥ शक्तिमहिम्न स्तोत्रं ॥

श्रीमातः त्रिपुरेपरात्परतरे देवी त्रिलोकी महा

सौन्दर्यार्णवमन्थनोत्भव सुधा प्राचुर्य वर्णोज्वलं

उद्यत्भानुसहस्त्र नूतन जपा पुष्पप्रभम् ते वपुः

स्वान्ते मे स्फुरतु त्रिकोणनिलयम् ज्योतिर्मयम् वाङ्मयम् ॥ १॥

आदिक्षान्त समस्तवर्णसुमणि प्रोते वितानप्रभे

ब्रह्मादि प्रतिमाभिकीलित षडाधाराब्ज कक्षोन्नते

ब्रह्माण्डाब्ज महासने जननि ते मूर्त्तिं भजेचिन्मयीं

सौषुम्नायत पीतपङ्कजमहा मध्यत्रिकोणस्थितां ॥ २॥

या बालेन्दुदिवाकराक्षि मधुरा या रक्तपत्मासना

रत्जा कल्पविराजितांगलतिका पूर्णेन्दुवक्त्रोज्वलि

अक्षसृक्सृणिपाश पुस्तकधरा याबालभानुप्रभा

तां देवीं त्रिपुरां शिवां हृदिभजेऽभीष्टात्थं सिद्धै सदा ॥ ३॥

वन्दे वाग्भव मैन्दवात्म सदृशं वेदादिविद्यागिरो

भाषादेह समुद्भवाः पुशुगताः छन्दांसिसप्त स्वरान्

ताळान् पञ्चमहाध्वनिन् प्रकटयान् अत्मप्रकाशेनयत्

तद्बीजं पदवाक्यमान जनकं श्री मातृके ते परं ॥ ४॥

त्रैलोक्यस्फुटमन्त्रतन्त्रमहिमा स्वात्मोक्तिरूपं विना
यद्बीजं व्यवहारजाल मखिलं नास्त्यैव मातः तव
तद्जाप्यस्मरण प्रसक्त सुमतिः सर्वज्ञतां प्राप्यकः
शब्दब्रह्मनिवासभूतवदने नेत्रादिभिः स्पर्धये ॥ ५॥

मात्रा यत्र विराजयेति विशदा तां अष्टधा मातृकां
शक्तीं कुण्डलिनीं चतुर्विधतनुं यः तत्वविन्मन्यते
सोऽविद्याखिल जन्मकर्मदुरितारण्यं प्रबोधाग्निना
भस्मिकृत्य विकल्प जालरहितो मातः पदं तद्व्रजेत् ॥ ६॥

तत् ते मध्यमबीजं अंब कलयाम्यादित्यवर्णां क्रिया
ज्ञानेछाद्यमनन्तशक्ति विभव व्यष्टीं व्यनक्तिस्फुटं
उत्पत्ति स्थिति कल्प कल्पित तनुः स्वात्मप्रभावेन यत्
काम्यं ब्रह्म हरीश्वरादि विबुधैः कामं क्रियायोजितैः ॥ ७॥

कामान् करणतांगतान् अगणितान् कार्यैरनन्तैर् मही-
मुख्यै सर्वमनोगतैरतिगतान् मानैर् अनेकै स्फुटं
काम क्रोध सलोभ मोह मदमात्सर्यादिष्टकं च यत्
बीजं भ्राजयति प्रणौमितदहं ते साधु कामेश्वरि ॥ ८॥

यद् भक्ताखिल कामपूरणचण स्वात्मप्रभावं महा
जाड्यध्वान्त विदारणैक तरणी ज्योतिः प्रबोधप्रदं

यद् वेदेत्सु च गीयते श्रुतिमुखं मात्रात्रयेणोमिति
श्री विद्येतव सर्वराज वशकृत् तत् कामराजं भजे ॥ ९॥

यत् ते देवि तृतीय बीजं अनल ज्वालावली सन्निभं
सर्वाधार तुरीय शक्ति परम ब्रह्माभिदाशब्दितं
मूर्द्धन्यान्त विसर्गभूषित महौ कारात्मकं तत्पदं
भ्राजद् रूपं अनन्यतुल्यमभितः स्वान्ते मम द्योततां ॥ १०॥

सर्वं सर्वतयेव सर्गसमये कार्येन्द्रियाण्यन्तरा
तत्तद् दिव्य ऋषीक कर्मभिरियं संख्याश्ववानापरा
वागर्त्थ व्यवहारकारण तनुः शक्तिर् जगत् रूपिणी
यद् बीजात्मकतांगता तवशिवे तं नौमि बीजंपरं ॥ ११॥

अग्नीन्दु द्युमणिप्रभञ्जन धरानीरान्तरस्थायिनी
शक्तिर् ब्रह्म हरीश वासवमुखा मर्त्त्यासुरात्मस्थितां
सृष्ट स्थावरजंगमस्थित महाचैतन्यरूपां च या
यद् बीजं स्मरणेन सैवभवती प्रादुर्भवत्यंबिके ॥ १२॥

स्वात्मश्री विचिताज विष्णु मघवः श्री पूरणैकत्रतं
सद् विद्या कविता विलास लहरी कल्लोलिनी दीपकं
बीजं यद् त्रिगुण प्रवृत्ति जनकं ब्रह्मेति यद्योगिना
शान्ताः सत्यमुपासते तदिहते चित्ते दधे श्रीपते ॥ १३॥

एकैकं तव मातृके परतरं संयोगि वा योगिवा
विद्यादि प्रकटप्रभाव जनकं जाड्यान्धकारापहं
यन्निष्ठा श्च महोत्पलासन महाविष्णु प्रहर्त्रादयो
देवाः स्वेषु विधीष्व नन्तमहिम स्फूर्त्तिं दध त्येव तत् ॥ १४॥

इत्थं त्रिण्यहमूल वाग्भव महा श्रीकामराजस्फुरः
शक्त्याख्यानि चतुश्रुति प्रकटितान् उत्कृष्ट कूटानिते
भूतर्त्तु श्रुति संख्यवर्ण विधितान् आरक्त कान्ते शिवे
योजानाति स एव सर्व जगतां सृष्टि स्थिति ध्वंसकः ॥ १५॥

ब्रह्मायोनि रमासुरेश्वरः सुहृल्लेखाभिरुक्तैः तथा
मार्त्ताण्डेन्दु मनोजहंस वसुधा मायाभि रुक्तं सितैः
सोमांबुक्षिति शक्तिभिः प्रकटितैर् बाणां गवेदै क्रमात्
वर्णैःश्रीशिवदेशिकेन विधितां विद्यां तवांबाश्रये ॥ १६॥

नित्यं यः तव मातृकाक्षरसखिं सौभाग्यविद्यां जपेत्
सांपूज्याखिलचक्रराजनिलयां सायन्तनाग्निप्रभां
कामाख्यां शिवनामतत्वमुभयं व्याप्तात्मना सर्वतो
दिप्यन्तीमिह तस्य सिद्धिरचिरात् स्वात्वत् स्वरूपैकता ॥ १७॥

आद्यैः अग्निरवीन्दुबिंबनिलयैः अंबात्रि लिंगात्मभिर्
मिश्रारक्तसिताप्रभैरनुपमैर् युष्मत्प्रभैः तैः त्रिभिः
स्वात्मोल्पादितकालल्लोक निगमावस्थामरातित्र यैः

उत्भूतं त्रिपुरेतिनाम कलयेत् यः ते सधन्यो बुधः ॥ १८॥

पञ्चाशन् निज देहजाक्षरमयैर् नानावीधैर् धातुभिर्
बह्वर्थैः पदवाक्यमानजनकैर् अर्थाविनाभावितैः
स्वाभिप्राय वदर्थकर्मफलदैः ख्यातैरन न्यैरिदं
विश्वं व्याप्यचिदात्मनाहमह मित्युज्जुंभसे मातृके ॥ १९॥

श्रीचक्रं श्रुतिमूलकोश इतिते संसारचक्रात्मकं
विख्यातं तदधिष्ठिताक्षरशिव ज्योतिर्मयं सर्वतः
एतन्मन्त्रमयात् मिखाभिररुणं श्रीसुन्दरीभिर्वृतं
मध्ये बैन्दवसिंहपीठललिते त्वं ब्रह्मविद्याशिवे ॥ २०॥

बिन्दुप्राणविसर्गजीवसहितं बिन्दुत्रिबीजात्मकं
षट्कूटानि विपर्ययेण निगते तारत्रिबालाक्षरैः
एभिः संपुटितं प्रजप्यविहरेत् प्रासादमन्त्रं परं
गुह्यात्गुह्यतमं सयोगचरितं सद्भोगमोक्षप्रदं ॥ २१॥

॥ शुभमस्तु ॥